क्रमार्थं गौतमवचनम्। स्त्रीधनं दुहितृणामप्रत्तानामप्रतिष्ठितानाञ्च। प्रथममप्रत्तानां तदभावे प्रत्तानां तदभावे सम्प्रूढ़ानाम्। स्त्रीधनं दुहितृणामितिसामान्यत: प्राप्तत्वात्। अप्रत्तानामित्यादिस्तु क्रमार्थत्वात्। तथा, याज्ञवल्क्य:।

'अप्रज:स्त्रीधनं भर्त्तुर्ब्राह्मादिषु चतुर्ष्वपि।
दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत्॥'

तत्र ब्राह्मादिषु विवाहेषु यल्लब्धमध्यग्निधनं स्त्रिया तत् तस्यां मृतायां प्रथमं दुहितॄणामेव तत्रापि प्रथमं कन्यायास्तदभावे प्रत्तायास्तदभावे परिणीताया: सर्व्वदुहित्रभावे च पुत्रस्याधिकार: अप्रज:स्त्रीधने भर्त्तुरधिकारात्। इहस्थितिना अप्रत्तापदेन अप्रत्ताद्यभावे सम्प्रूढ़ाया अप्यधिकार: सूचित:।

'ब्राह्मदैवार्षगान्धर्व्वप्राजापत्येषु यद्धनम्।
अप्रजायामतीतायां भर्त्तुरेव तदिष्यते॥
यत्त्वस्या: स्याद्धनं दत्तं विवाहेष्वासुरादिषु।
अतीतायामप्रजायां मातापित्रोस्तदिष्यते॥'

अस्या: स्याद्दत्तमिति पराचीनं पूर्व्वत्रानुषज्यते। तेन विवाहेषु यद्धनं दत्तमिति सम्बन्धात् वैवाहिकधनमात्रप्रतीतेर्न यावद्धनविषयत्वम्। तथा यम:।

'आसुरादिषु यद्द्रव्यं विवाहेषु प्रदीयते॥'

विवाहक्रियायां पूर्व्वापरीभूतायां यद्द्रव्यं प्रदीयते इति यौतकधनमात्रगोचरत्वमेव प्रतीयते।" इति दायभाग:॥*॥ "ऊढ़ाया यौतकधने प्रथमं कुमारी तदभावे वाग्दत्ता अधिकारिणी। एतयोरभावे ऊढ़यो: पुत्रवतीसम्भावितपुत्त्रयोर्युगपदधिकार:। एकाभावे चापराया:। एतयोरभावे वन्ध्याविधवयोस्तुल्याधिकार:। एकाभावे चापराया:। तत: पुत्रदौहित्रपौत्रप्रपौत्रसपत्नीपुत्रपौत्रप्रपौत्राणां क्रमेणाधिकार:। अन्यत्मते सपत्नीपुत्रानन्तरं दौहित्रस्याधिकार इति विशेष:। ततो ब्राह्मादिविवाहपञ्चकसमयलब्धयौतकधने भर्त्ता भ्राता माता पिता चेति क्रम:। आसुरादिविवाहत्रयसमयलब्धयौतकधने माता पिता भ्राता भर्त्ता चेति क्रम:। ततो देवर: ततो देवरपुत्रभर्त्तृश्वशुरपुत्त्रौ भगिनीपुत्र: ततो भर्त्तृभागिनेय: ततो भ्रातृपुत्र: ततो जामाता तत: श्वशुर: ततो भ्रातृश्वशुर: तत आनन्तर्य्यक्रमेण सपिण्डा: तत: सकुल्या: तत: समानोदका:।" इति तट्टीकायां श्रीकृष्णतर्कालङ्कार:॥

यौधिष्ठिरं, त्रि, ( युधिष्ठिरस्य इदमिति। युधिष्ठिर + अण्। ) युधिष्ठिरसम्बन्धि। यथा,—

"सा च यौधिष्ठिरी सेना गाङ्गेयशरताड़िता।
प्रतिपत्पाठशीलानां विद्येव तनुतां गता॥"

इति महाभारतम्॥

( युधिष्ठिरस्यापत्ये, पुं। यथा, महाभारते। ६। ५०। ५६।

"यौधिष्ठिर: सुसंक्रुद्ध: सौवलं निशितै: शरै:।
व्यदारयत संग्रामे मघवा इव दानवम्॥"

वासुदेवस्य पत्नीविशेषे, स्त्री। यथा, हरिवंशे। १६०। २०—२१।

"कौशिक्यां सुतसोमायां यौधिष्ठिर्य्यां युधिष्ठिर:।
कापाली गरुड़श्चैव जज्ञाते चित्रयोधिनौ॥
एवमादीनि पुत्त्राणां सहस्राणि निबोध मे।
दशायुतं समाख्याता वासुदेवस्य ते सुता:॥")

यौधेय:, पुं, ( योधमर्हतीति। योध + ढञ्। यद्वा, "पार्श्वादियौधेयादिभ्यामणञौ।" ५। ३। ११७। इति स्वार्थे अञ्। ) योद्धा। इति सिद्धान्तकौमुदी॥ (युधिष्ठिरपुत्र:। स च शैव्यराजदौहित्र:। यथा, महाभारते।१।६५।७६।

"युधिष्ठिरस्तु गोवासनस्य शैव्यस्य देविकां नाम कन्यां स्वयम्बरां लेभे। तस्यां पुत्रं जनयामास यौधेयं नाम॥" नृगराजपुत्त्रा: यौधेया इति ख्याता:। यथा, हरिवंशे।३१।२५।

"दृषद्वत्यास्तु संजज्ञे शिविरौशीनरो नृप:।
शिवेस्तु शिवयस्तात! यौधेयास्तु नृगस्य ह॥")

यौनं, क्ली, ( योनेरिदमिति। योनि + अण्। ) योनिसम्बन्धाधीनपापम्। यथा। बौधायन:।

"संवत्सरेण पतति पतितेन सहाचरन्।
याजनाध्यापनाद्यौनात् सद्यो हि शयनाशनात्॥"

सुमन्तु:। यश्चैतैर्यौनमौखश्रौवादीनां सम्बन्धानामन्यतमेन सह सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यादिति। इयात् कुर्य्यात्। एतदेवेति द्वादशवार्षिकमित्यर्थ:। अत्र याजनादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते। इति प्रायश्चित्तविवेक:॥ ( उत्पत्तिकारणम्। यथा, महाभारते। १३। १०२। २५।

"यत्राग्नियौनाश्च वसन्ति लोका
अब्योनय: पर्व्वतयोनयश्च॥"

उत्तरापथजातजातिविशेषे, पुं। यथा, महाभारते। १२। २०७। ४३।

"उत्तरापथजन्मान: कीर्त्तयिष्यामि तानपि।
यौनकाम्भोजगान्धारा: किराता वर्व्वरै: सह॥")

यौवतं, क्ली, ( युवतीनां समूह:। युवति + "भिक्षादिभ्योऽण्।" ४। २। ३८। इति अण्। पुंवद्भावाभावश्च।) युवतिसमूह:। इत्यमर:।२। ६। २२॥ ( यथा, गीतगोविन्दे। १०। १५।

"रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवावहो विबुधयौवतं वहसि तन्वि! पृथ्वीगता॥"

युवतिभि: कृतमिति। नृत्यविशेष:। यथा, सङ्गीतदामोदरे।

"मधुरं बहुलीलाभिर्नटीभिर्यत्र नृत्यते।
वशीकरणविद्याभं तल्लास्यं यौवतं मतम्॥")

परिमाणम्। इति अमरटीकायां भरत:॥

यौवनं, क्ली, (युवन् + "हायनान्तयुवादिभ्योऽण्।" ५। १। १३०। इति अण्। ) यूनो भाव:। तत्पर्य्याय:। तारुण्यम् २। इत्यमर:॥ वय: ३ इति जटाधर:॥ तत्तु षोड़शवर्षमारभ्य सप्ततिवर्षपर्य्यन्तम्। यथा,—

"आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते।
वृद्ध: स्यात् सप्ततेरूर्द्ध्वं वर्षीयान् नवते: परम्॥"

इति स्मृति:॥

नवयौवनलक्षणं यथा,—

"दरोद्भिन्नस्तनं किञ्चित् चलाक्षं मेदुरस्मितम्।
मनागभिस्फुरद्भावं नव्यं यौवनमुच्यते॥"

इत्युज्ज्वलनीलमणि:॥

("गर्भेश्वरत्वम् अभिनवयौवनत्वमप्रतिरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। सर्व्वाविनयानामेकैकमप्येषामायतनम्। किमुत समवाय:। यौवनारम्भे च प्राय: शास्त्रजलप्रक्षालननिर्म्मलापि कालुष्यमुपयाति बुद्धि:। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टि:। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृति:। इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका। नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनस:। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्त्तक: पुरुषमत्यासङ्गो विषयेषु।" इति कादम्बर्य्यां चन्द्रापीड़ं प्रतिशुकनाशोपदेश:॥)

नवयौवनकारकमौषधं यथा,—

"अश्वगन्धानागबलागुड़मांसनिषेविणाम्।
रूपं भवेद्यथा तद्वत् नवयौवनचारिणाम्॥"

इति गारुड़े १८६ अध्याय:॥

यौवनकण्टकं, पुं, क्ली, ( यौवने कण्टकमिव दु:खदत्वात्। ) युवगण्ड:। इति शब्दमाला॥ वयस्फोड़ा इति भाषा॥

यौवनपिड़का, स्त्री, ( यौवने पिड़का। ) युवकाले मुखे जात: क्षुद्रस्फोटक:। वयस्फोड़ा इति भाषा॥ ( यथा, सुश्रुते निदानस्थाने। १३।

"यौवनपिड़का पद्मिनी कण्टका जतुमणिरित्यादि॥" ) तल्लक्षणं यथा,—

"शाल्मलीकण्टकप्रख्या: कफमारुतशोणितै:।
जायन्ते पिड़का यूनां वक्त्रे या मुखदूषिका:॥"

इति सुश्रुते। १। १४ अध्याय:॥

अस्याश्चिकित्सा मुखदूषिकाशब्दे द्रष्टव्या॥

यौवनलक्षणं, क्ली ( यौवनस्य लक्षणं चिह्नम्। ) लावण्यम्। स्तन:। इति मेदिनी। ने, ११७॥ तारुण्यचिह्नम्॥

यौवनाश्व:, पुं, (युवनाश्वस्यापत्यमिति। युवनाश्व + अण्। ) मान्धातृराज:। इति त्रिकाण्डशेष:॥ अपि च।

"यौवनाश्वोऽथ मान्धाता चक्रवर्त्त्यवनीपति:।
सप्तद्वीपवतीमेक: शशासाच्युततेजसा॥
ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणै:॥
सर्व्वदेवमयं देवं सर्व्वात्मकमतीन्द्रियम्॥
द्रव्यं मन्त्रो विधिर्यज्ञो यजमानस्तथर्त्विज:।
धर्म्मो देशश्च कालश्च सर्व्वमेतद्यदात्मकम्॥
यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति।
तत् सर्व्वं यौवनाश्वस्य मान्धातु: क्षेत्रमुच्यते॥